# विष्णुधर्मोत्तरपुराणे काव्यतत्त्वम्

गुरुप्रसादकोइराला, विद्यावारिधिः

सहप्राध्यापकः - साहित्यम्

ने.सं.वि., पिण्डेश्वरविद्यापीठम्, धरानः

koiralaguru38@gmail.com

https://doi.org/10.3126/pj.v5i8.73795

**लेखसारः**

विश्ववाङ्मये संस्कृतवाङ्मयं सर्वप्राचीनं मन्यते । अत्र श्रुतिस्मृतिपुराणमयी यादृशी सम्पत्तिर्विद्यते तादृशी अन्यत्र भाषावाङ्मयेषु दुर्लभा एव ज्ञायते । श्रुतिसाहित्यस्यावज्ञाने काठिन्यमनुभूयते । तस्य परिबोधने ब्राह्मणोपनिषदारण्यका ग्रन्था विकसिताः । तेषामपि ज्ञानवञ्चिता जिज्ञासवः सरलतया प्रतिपादितान् पुराणग्रन्थानधीत्य तत्र स्थितान् सुबोध्यान् कथादिकान् संश्रुत्य वा अनायासेन ज्ञानवैभवमाप्नुवन्ति । तत्र सुपात्रैः संयोजितासु कथासु प्रतिपादितान् ब्रह्मविद्यादिगभीरज्ञानविषयान् सामान्यजना अपि सारल्येन जानन्ति । तस्मात् पौरस्त्यसाहित्यपरम्परायां पौराणिकग्रन्थानां महत्त्वमन्यूनं वरीवर्ति । एतत्क्रमे काव्यशास्त्रस्य जटिलविषया अपि पौराणिकग्रन्थे प्रतिपाद्य जनसाधारणानां कृतेऽपि सुबोध्याः कृता विद्यते । प्रसङ्गेऽस्मिन् प्रथमतोऽग्निपुराणमायाति । महापुराणेऽस्मिन् प्रायः सर्वे काव्यशास्त्रीयविषयाः प्रतिपादिताः सन्ति । तदनु विष्णुधर्मोत्तराख्ये उपपुराणे काव्यशास्त्रीयविषयाः प्रतिपादिता लभ्यन्ते । अधुना नेपालसंस्कृतविश्वविद्यालयेन साहित्यविषयस्य शास्त्रीस्तरीयपाठ्यक्रमे विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयांशस्य पाठ्यवस्तुत्वेन स्थापितत्वात् सान्दर्भिकमिति विचार्यास्यांशस्यात्र विवेचनं क्रियते । पुराणेऽस्मिन् प्रतिपादिताः केचिद् विषयाः काव्यशास्त्रीयग्रन्थे विवेचितेषु विषयेषु साम्यं भजन्ते । कतिचिद् नूतनत्वं प्रकाशयन्ति । अतोऽत्र के काव्यशास्त्रीयविषयाः प्रतिपादिताः सन्ति ? तेषां काव्यशास्त्रीयग्रन्थैः सह कीदृशः सम्बन्धः ? इत्यादिविषयं विश्लिष्य तथ्यनिस्सारणं क्रियते । अध्ययनेऽस्मिन् पुस्तकालयीयसामग्रीमुपयुज्य काव्यशास्त्रपुराणयो विवेचितान् काव्यशास्त्रीयविषयान् विनिभाल्य तुलनात्मक-विश्लेषण-व्याख्यात्मकविधिभिः समधीत्य विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयांशस्य अन्य काव्यशास्त्रीयग्रन्थेषु सम्बन्धात्मकं तथ्यं निष्काष्यते ।

*शब्दकुञ्जी* - अलङ्कारः, काव्यम्, काव्यशास्त्रम्, पुराणम्, नाटकम्, रसः ।

## विषयपरिचयः

पौरस्त्यकाव्यशास्त्रस्य कृते पौराणिका ग्रन्था महत्त्वाधिक्यं भजन्ते । प्रायशः सर्वेऽपि पौराणिकग्रन्थाः श्रव्यदृश्यकाव्ययोः कृते कथातत्त्वस्योपजीव्यरूपेण स्वीकृता विद्यन्ते । इत्येव नापितु केषुचिद् ग्रन्थेषु काव्यशास्त्रीयविषयस्य महत्त्वाधायिका चर्चा प्राप्यते । सन्दर्भेऽस्मिन् अग्निपुराणे काव्यशास्त्रीयविषयाणां विवेचनं लभ्यते । एवमेव विष्णुधर्मोत्तरपुराणस्य तृतीये खण्डे मार्कण्डेयवज्रयोः संवादेऽपि काव्यशास्त्रीयविषयाः समुल्लिखिता विद्यन्ते । तेषां काव्यशास्त्रेतिहासे कीदृशं महत्त्वमित्यधीयते ।

अत्र विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयांशे समाविष्टानां काव्यशास्त्रीयविषयाणां सम्बन्धयुताः काव्यशास्त्रगतविषया एवाध्ययनस्य क्षेत्रत्वेन स्वीक्रियन्ते ।

विष्णुधर्मोत्तरपुराणं बृहदाकारयुतं विद्यते । तत्र स्वल्पेऽपि अंशे वर्णितस्य काव्यशास्त्रीयविषयस्य विनिभालनं काठिन्यमनुभूयते । तस्मात् सारल्येन तत्र के के काव्यशास्त्रीया विषया विद्यन्ते ? तेषां काव्यशास्त्रीयग्रन्थेषु कुत्र कुत्र कीदृशः सम्बन्धो विद्यते ? इति समस्यानिवारणार्थं विष्णुधर्मोत्तरपुराणे समाविष्टानां काव्यशास्त्रीयविषयाणां समीक्षणम्, तेषां सम्बन्धाध्ययनं च क्रियते ।

विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयांशमेवोद्दिश्य पृथक्तयाध्ययनमद्यावधि स्पष्टतया नोपलभ्यते । पुराणग्रन्थस्य विवेचने वा काव्यशास्त्रस्येतिहाससमीक्षणे विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयांशस्य सङ्क्षिप्ततया विवेचनं प्राप्यते । 'संस्कृत काव्यशास्त्र का इतिहास' इति ग्रन्थे पिविकाणे इति नामकः काव्यशास्त्रकारो विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयमंशं विवेचयति । अयं काव्यशास्त्रसमीक्षकैर्विद्वद्भिर्विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयांशस्योपेक्षा किं कृता इति आश्चर्यं व्यनक्ति । तत्र विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयांशः पौरस्त्यकाव्यशास्त्रस्येतिहासे उपेक्षायोग्य नैवापितु तेन काव्यशास्त्रीयविषये निर्दिष्टं नावीन्यं सर्वैः समादरणीयं विद्यते इत्युल्लिखति । एवमेव माण्डवीचन्द्रा स्वकीये 'पौराणिक काव्यशास्त्र तत्त्वानुशीलन' इति नामके ग्रन्थे विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयखण्डस्य महत्त्वं प्रकाशयति। अन्यत्र काव्यशास्त्रीयेतिहाससम्बद्धग्रन्थेष्वपि विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयभागस्योल्लेखो लभ्यते । सर्वेषु पुराणसमीक्षाग्रन्थेषु विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयभागस्य महत्त्वं प्रकाश्य तस्य विस्तृताध्ययनस्यावश्यकता संसूचिता विद्यते ।

काव्यशास्त्रीयविषयविवेचितेषु विविधेषु ग्रन्थेषु विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयभागस्य सामान्यसमीक्षा प्राप्यते । अस्य महत्त्वमपि प्रकाश्यते परं सविस्ताराध्ययनं नोपलभ्यते । विष्णुधर्मोत्तरपुराणाख्यं बृहद्ग्रन्थमानीय काव्यशास्त्रीयं खण्डमध्येतुं विद्यार्थिनः कृते काठिन्यं विद्यते । अतोऽद्यावधि पृथक्तया पूर्णरूपेणानधीतस्य विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयांशस्याध्ययनमेव शोधान्तरालमिति विचार्य छात्राणां सुलभबोधाय इदमध्ययनकार्यं क्रियते ।

काव्यशास्त्रजिज्ञासुजनानामपेक्षापूरणमेवास्यौचित्यं विद्यते । विष्णुधर्मोत्तरपुराणस्य केवलं काव्यशास्त्रीयभागविवेचनमेवास्याध्ययनस्य सीमा निर्धारिता अस्ति।

## विषयविश्लेषणम्

काव्यशास्त्रं काव्यरचनायाः कृते नियमनिर्देशनम्, रचितस्य काव्यस्य समीक्षणार्थं साधनतत्त्वनिर्धारणञ्च करोति । काव्यस्य नियमनार्थं नैकैः काव्यशास्त्रज्ञैर्विविधाः सिद्धान्ताः प्रतिपादिताः सन्ति । अस्यां परम्परायां पौराणिकग्रन्था अपि स्वकीयां भूमिकां प्रस्तुवन्ति । काव्यशास्त्रीयविषयविश्लेषितेषु पौराणिकग्रन्थेषु विष्णुधर्मोत्तरपुराणस्य महत्त्वमन्यूनं विद्यते । अस्य पुराणस्य समयः कदा आसीदिति विषये विदुषां मतैक्यं नास्ति । अस्य काव्यशास्त्रीयविषयवर्णनदृष्ट्या नाट्यशास्त्रमनु भामहात् प्राक् अस्य समयो भवेदित्यनुमीयते । (कुमारः, १९७३ : ८९,९०) नाट्यशास्त्रे चत्वारोऽलङ्कारा विद्यन्ते । अत्र सप्तदशालङ्काराः सन्ति । अनन्तरं भामहोऽष्टत्रिंशदलङ्कारान् समुल्लिखति । अनेन क्रमेणास्य समय पञ्चमशतकेऽनुमीयते । पुराणेऽस्मिन् तृतीयखण्डस्य १४ अध्यायात् ३१ अध्यायपर्यन्तं प्रायशः सर्वाणि काव्यतत्त्वानि समीक्षितानि विद्यन्ते । अत्र मार्कण्डेयमुनिः भगवतः पूजनार्थं कीदृशी प्रतिमा उपयुक्ता इति राज्ञो वज्रस्य जिज्ञासाशमनार्थं प्रतिमास्वरूपमुपस्करोति । भक्तैः पूजनीया देवमूर्तिः चित्रसूत्रविधानेन निर्मिता भवेदिति निर्दिशति यत्-

चित्रसूत्रं न जानाति यस्तु सम्यङ् नराधिप ।

प्रतिमालक्षणं वेत्तुं न शक्यन्तेन कर्हिचित् ॥

चित्रसूत्रविधानेन देवतार्चां विनिर्मिताम् ।

सुरूपां पूजयेद्विद्वान् तत्र सन्निहिता भवेत् ॥ (विष्णुधर्मोत्तरपुराणम्, २०८० : ३)

चित्रसूत्रस्य बोधाय नृत्तशास्त्रस्य ज्ञानमावश्यकं भवति-

विना तु नृत्तशास्त्रेण चित्रसूत्रं सुदुर्विदम् ।

जगतो न क्रिया कार्या द्वयोरपि यतो नृप ॥ (विष्णुधर्मोत्तरपुराणम्, २०८० : ३)

नृत्तशास्त्रस्य ज्ञानाय आतोद्य(वाद्य)स्वरूपज्ञानमपेक्ष्यते -

आतोद्यं यो न जानाति तस्य नृत्तं हि दुर्विदम् ।

आतोद्येन विना नृत्तं विद्यते न कथञ्चन ॥ (विष्णुधर्मोत्तरपुराणम्, २०८० : ३)

आतोद्यज्ञानाय गीतशास्त्रं ज्ञातुमर्हति-

न गीतेन विना शक्यं ज्ञातुमातोद्यमुद्यत ।

गीतशास्त्रविधानज्ञ सर्वं वेत्ति यथाविधि ॥ (विष्णुधर्मोत्तरपुराणम्, २०८० : ४)

गीतशास्त्रमेव गद्यपद्यादिकं काव्यशास्त्रमपि समाविश्य वर्णयति । तत्र पूर्वाचार्यैर्वर्णितानि श्रव्यदृश्यकाव्ययोरङ्गाङ्गीरूपेणावश्यकानि तत्त्वानि विवेचितानि सन्ति । विष्णुधर्मोत्तरपुराणे विवेचितानि कति काव्यतत्त्वानि सन्ति । तेषां काव्यशास्त्रस्येतिहासे कीदृशं महत्त्वं विद्यते इत्यत्राध्ययनस्य विषयो निर्धारितः ।

**विष्णुधर्मोत्तरपुराणे प्रतिपादिताः काव्यशास्त्रीयविषयाः**

***काव्यस्वरूपम्***

विष्णुधर्मोत्तरपुराणस्य पञ्चदशाध्याये काव्यस्य महाकाव्यस्य च लक्षणमुल्लिखितं विद्यते । शास्त्रे धर्मादिचतुर्वर्गस्योपदेशो भवति । पूर्वैराचरितस्य धर्मार्थसाधनभूतस्य मोक्षस्य यत्र समाविश्यते स इतिहासः कथ्यते । उपदेशेन विना व्यङ्ग्यतया तदेव धर्मार्थकामरूपैः साधनैर्मोक्षो वर्ण्यते चेद् तदेव काव्यं भवति । तत्र एकस्यैव नायकस्य चरितं वर्णितं भवेत्-

धर्मार्थकाममोक्षाणां शास्त्रं स्यादुपदेशकम् ।

पूर्वैराचरितं सद्भिर्धर्मकामार्थसाधनम् ॥

मोक्षस्य यत्रोपन्यास इतिहासः स उच्यते ।

तदेव काव्यमित्युक्तं चोपदेशं विना कृतम् ॥

एकस्य चरितादेव तथा काव्यं प्रकीर्तितम् । (विष्णुधर्मोत्तरपुराणम्, २०८० : २८)

**महाकाव्यम्**

धर्मार्थकामसाधनस्योपदेशयुतं महाकाव्यं भवति । तत्र नायकप्रतिनायकयोर्मध्ये सत्पथान्वयी, धर्मविजयी, लोकविजयी च नायको भवेत् । तस्याभ्युदयवर्णनमावश्यकं भवति । प्रतिनायके नायकस्याघात वर्णनीयः, परं नायकस्य मरणं नैव वर्णयेत् । छन्दोविरहितं गद्यम्, व्याकरणशास्त्रविरोधिशब्दस्वरूपम्, कष्टाक्षरपदन्यासम्, अश्लिलार्थप्रदायकवस्तुवर्णनञ्च न कार्यम् । एवञ्च लोकविगर्हितम्, पूर्वापरविरुद्धम्, ससंशयं वाक्यञ्च न

वक्तव्यम् । तत्र ऋत्वद्रिनिम्नगादिप्रकृतिवर्णनमावश्यकं भवति । तच्च शृङ्गारादिनवरसासिक्तं भवेदित्यादिमहाकाव्यस्वरूपमधस्तनेषु पद्येषु वर्णितं विद्यते ।

निबद्धो यत्र राजेन्द्र नायकप्रतिनायकौ ॥
प्रयाणोद्युतसंप्रेषयुद्धयुक्तं तदेव तु । नायकाभ्युदयोपेतं महाकाव्यं तदिष्यते ॥
वर्णयेच्च महाकाव्ये देशपत्तनपार्थिवान् । ऋत्वद्रिनिम्नगाश्चैव तथा नारीश्च पार्थिव ॥
वर्णनीयौ तथैवात्र नायकप्रतिनायकौ । नायको धर्मविजयी सताम्पन्थानमाश्रितः॥
तथा च लोकविजयी विज्ञेयः प्रतिनायकः । प्रतिनायकघातस्तु वक्तव्यो नेतरस्य तु ॥
नायकस्य महाराज मरणं नैव वर्णयेत् । सशरीरस्य यस्य स्यात्संप्राप्तिस्तस्य वर्णयेत् ॥
छन्दोविरहितं गद्यं शब्दशास्त्रविरोधि च । कष्टाक्षरपदन्यासमश्लीलवचनान्वितम् ॥
तस्मादुल्लक्ष्यवाक्यार्थमप्रसिद्धाभिधानवत् । काव्यबन्धं न कर्तव्यं पुनरुक्तं च यद्भवेत् ॥
विस्मये वाभ्यसूयायां भयशोकत्वरासु च । हर्षे च वीप्सा कर्तव्या पुनरुक्तं न तद्विदुः ॥
दूतवाक्ये तथा स्वप्ने कार्यगत्या तथागते। पुनर्वर्धननिर्देशे पुनरुक्तं च तद्विदुः ॥
ससंशयं न वक्तव्यं प्रतिज्ञारहितं तथा । पूर्वापरविरुद्धं च यच्च लोकविगर्हितम् ॥
शृङ्गारहास्यकरुणारौद्रवीरभयानकैः । बीभत्साद्भुतशान्ताख्यै रसैः कार्यं समन्वितम् ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : २८)

तत्र महाकाव्यलक्षणस्य चरमश्लोके साररूपेण महाकाव्ये आवश्यकीयानि वस्तूनि निर्दिष्टानि विद्यन्ते, यथा-

काव्यं कलाकौशलसंप्रयुक्तं धर्मेण चार्थेन तथोपपन्नम् ।
धर्मेण युक्तस्य च नायकस्य कार्यं तथा चाभ्युदयान्तमेव ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : २८)

*अलङ्कारः*

अग्निपुराणकारोऽलङ्कारस्य स्वरूपं नोल्लिखति । एतेनानुमीयते यत्- पूर्वाचार्यैः कृतमलङ्कारलक्षणमेवानेनाभिनन्दितमिति । चतुर्दशोऽध्यये सनामस्वरूपोल्लेखपूर्वकं केवलं सप्तदशालङ्कारवर्णनं करोति । तत्रानुप्रासयमकादीनां शब्दालङ्काराणाम्, रूपकादीनामर्थालङ्काराणां स्वरूपवर्णनं विद्यते । तत्र सप्तदशालङ्काराणामेव सामान्यरूपेण स्वरूपचर्चा प्राप्यते । तेषु १. अनुप्रासः २. यमकः ३. व्यतिरेकः ४. श्लेषः ५. उत्प्रेक्षा ६. अर्थान्तरन्यासः ७. उपन्यासः ८. विभावना ९. अतिशयोक्तिः

१०. वार्ता ११. यथासङ्ख्यम् १३. विशेषोक्तिः १४. विरोधः १५. निन्दास्तुतिः १६. निदर्शनम् १७. अनन्वयश्च सन्ति। विष्णुधर्मोत्तरपुराकारोऽलङ्कारस्य चर्चां प्राग्जातानामाचार्याणां मतमनुसृत्यैव विदधातीति प्रायशोऽलङ्कारलक्षणे समुल्लिखति। तस्मादलङ्कारेषु पूर्णतया नवीना धारणा नोपलभ्यते।

उत्प्रेक्षाख्यो ह्यलङ्कारः कथित स पुरातनैः। उपन्यासस्तथान्य स्यात्प्रस्तुताद्यत् क्वचिद् भवेत्॥

यथासङ्ख्यमिति प्रोक्तमलङ्कारपुरातनैः। विशेषप्रापणादुक्ता विशेषोक्तिस्तथा नृप॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : २६)

विष्णुधर्मोत्तरपुराणकारः पूर्ववर्त्तिभिः कृतेष्वलङ्कारस्वरूपेषु पूर्णतया परिचितः प्रभावितश्चासीत्। अनेनालङ्कारः काव्यस्य कृते आवश्यक इति विचार्य तेषामेवानुकृत्य साङ्केतिकरूपेणालङ्कारचर्चा विहिता इत्यनुमीयते।

*प्रहेलिका*

षोडशोऽध्याये पूर्वाचार्यैर्दोषस्य परिहाररूपेण स्वीकृतं प्रहेलिका इति परिहासात्मकं काव्यभेदं सलक्षणं प्रतिपादितं विद्यते। राजसभारभ्य ग्रामीणजनपर्यन्तं मनसो परिष्कारार्थं विरेचनार्थं वा प्रहेलिकाप्रयोगपरम्परा प्राचीनकालादेव प्रारब्धा प्राप्यते। कादम्बर्यादिग्रन्थे प्रहेलिकायाः प्रयोगपरम्परा सङ्केतिता विद्यते यत्- “कदाचिदक्षरच्युतक-मात्राच्युतक-बिन्दुमतीगूढचतुर्थपाद-प्रहेलिकाप्रदानादिभिः, वनितासम्भोगसुखपराङ्मुखः सुहृत्परिवृतो दिवसमनैषीत्” (भट्टः, १९९९ : २२) विशिष्टसामान्यजनैः सर्वाधिकमनोरञ्जनप्रदोऽनुमोदितश्चेयं काव्यभेदोऽन्यत्र सादरेण स्वीकृतो नोपलभ्यते। विष्णुधर्मोत्तरपुराणे तु भेदसहिता प्रहेलिका स्वीकृता विद्यते। जनसाधारणे प्रचलितासु प्रहेलिकासु अश्लीलदोषो भवति परं काव्ये तद्वर्जनमाश्यकमिति विष्णुधर्मोत्तरपुराणकारो वर्णनसीमापि निर्धारयति। प्रहेलिका एकपद्यात्मकं वा द्विपद्यात्मकमेव भवति बहुपद्यात्मिका प्रहेलिका न कर्तव्या इति चोल्लिखति, यत्-

काव्ये येऽभिहता दोषाः कैश्चित्तेभ्यः प्रहेलिकाः। कर्तव्याश्च तथैवान्यास्तासां वक्ष्यामि लक्षणम्॥

श्लोकेनैकेन वा द्वाभ्यां कर्तव्या तु नरोत्तम। न कर्तव्याश्च ता राजन्बहुश्लोकनिबन्धनाः॥

अश्लीलमेतास्वपि नैव कार्यं तद्वर्ज्यमाहुः कवयो नरेन्द्र॥

उद्वेजनीयं तु सतां तदुक्तमश्लीलबन्धं सुखदं न काव्यम्॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ३०)

*पुराणम्*

संस्कृतवाङ्मये पुराणस्य महत्त्वमन्यूनं विद्यते । प्रायशः सर्वेषामपि शास्त्राणामुपजीव्यं पुराणमेव दृश्यते । वैदिकसाहित्यमनु पौराणिकसाहित्यमायाति यत्र वैदिकग्रन्थानां महत्त्वं प्रकाश्यते । कथ्यते च यत्- 'पुराणज्ञानं विना जनो वैदिकसाहित्यं नाभिनन्दति ।' वैदिकसाहित्यस्यैव नापितु लौकिकाचारव्यवहारपरिज्ञानं पुराणग्रन्थादेव भवति । प्रायशः काव्यरचनायामाधारतया स्थितं कथानकं पुराणग्रन्थादेव गृह्यते । एतादृशं महत्त्वाधाकं पुराणं कीदृशं भवतीति काव्यशास्त्रज्ञानोन्मुखानां कृते आवश्यकमिति विचार्य विष्णुधर्मोत्तरपुराणकारः काव्यशास्त्रस्य विवेचनक्रमे पुराणस्य स्वरूपमपि वर्णयति यत्-

कथितानि तथार्थानि पुराणं च तथा द्विज । प्रक्रिया प्रथमः पादः कथावस्तुपरिग्रहः ।।
उपोद्घातानुषङ्गौ च तथा संहार एव च । चतुष्पादं हि कथितं पुराणं भृगुनन्दन ।।
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ।।

(विष्णुधर्मोत्तरपुराणम्, २०८० : ३१)

*नाटकम् (द्वादशरूपकम्)*

पौरस्त्यसमालोचनापरम्परायाः प्रारम्भ एव दृश्यकाव्यमाश्रित्य सञ्जातः। भरतमुनिना दृश्यकाव्यमुद्दिश्य रचितं नाट्यशास्त्रमेव पौरस्त्यकाव्यशास्त्रस्याधारो मन्यते । विष्णुधर्मोत्तरपुराणेऽपि सप्रभेदं दृश्यकाव्यस्वरूपं समाविष्टं विद्यते । अस्य दृश्यकाव्यसमीक्षणं नाट्यशास्त्राधृतमनुज्ञायते । तत्र दशरूपकवर्णनं विद्यते परमत्र द्वादशरूपकविवेचनमस्ति । द्वादशरूपकेषु नाटकस्याङ्गोपाङ्गवर्णनं विद्यते ।

इतिहासानुसारेण पुराणानां समीक्षितम् । चरितं त्रिदशानां वा **नाटकं** तत्र कीर्तितम्।।

एकनायकसंयुक्तं नायकप्रतिनायकैः। संयुक्तमथवा कार्यः काव्ये वै तत्र नायकः ।।
सर्वास्तु वृत्तयस्तत्र तत्र सर्वे तथा रसाः । कालप्रयोगं च तथा युक्त्या संदर्शयेन्नृप ।।
एवंविधा सशृङ्गारा चतुरङ्काः तु **नाटिका** । कृतं **प्रकरणं** तद्वत्स्वयमुत्पाद्य वस्तुना ।।
ब्राह्मणो नायकस्तत्र वणिक्च नृपसत्तम । एवं **प्रकरणी** कार्या चतुरङ्कापि सा भवेत् ।।
इतिहासानुबन्धो वा स्वयमुत्पाद्य वा कृतः । भारतीकरुणप्रायो निवृत्तं समनन्तरम् ।।
चतुष्टयाङ्**कः** कर्तव्यो दिव्यनायकवर्तितः । इतिहासानुसारेण **प्राण**श्चैकाहिकः स्मृतः ।।
एकांको युद्धबहुलस्वात्मशंसापरस्तथा । आकाशकथनैर्युक्तस्त्वेकपात्रकृतक्रियः ।।
प्रोक्तः **समवतारा**ख्यस्त्रिदशासुरनायकः । त्रिशृङ्गारस्त्रिकपटस्तथा द्वादशनायकः ।।
**ईहामृगो**ऽथ बह्वङ्कस्तथा गन्धर्वनायकः । शृङ्गारबहुलः कार्योऽतृप्त योनिरसाश्रयः ।।

ऐकाहिको दृप्तरसो **व्यायोग**श्चैकनायकः । **वीथी** त्रयोदशाङ्का स्यात्तथा नायकवर्जिता ॥

**डिमा**ख्यश्च तथा प्रोक्तो रसस्तु सुरनायकः । तथा रौद्ररसप्रायः प्रख्यस्तविषयान्वितः ॥

एकाङ्को हास्यबहुलस्तथैवोदात्तनायकः । कार्यः **प्रहसना**ख्यस्तु वेश्याविटसमन्वितः ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ३२)

*नाट्यरसनिबन्धनम्*

विष्णुधर्मोत्तरपुराणकारो रसे स्नेहातिरेकं प्रदर्शयति । रसप्रकरणे रसानां साङ्गोपाङ्गं वर्णितं विद्यते तथापि स्नेहातिशयेन नाटकप्रकरणेऽपि सनामरसान्नुल्लिख्य नाट्यकाव्ये रसतत्त्वस्यावश्यकतां दृढीकरोति ।

शृङ्गारहास्यकरुणवीररौद्रभयानकाः । बीभत्साद्भुतशान्ताख्या नव नाट्यरसाः स्मृताः ॥

बन्धो रसानुगः कार्यः सर्वेष्वेतेषु यत्नतः । सप्रधानमेवैतत्सर्वनाट्यं नराधिपः ॥

एते कलाकौशलशीलयुक्ताः कार्यास्तथा लोक विधानयुक्ताः ।

धर्मार्थकामाद्युपदेशगाश्च हिताय लोकस्य नरेन्द्रचन्द्र ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ३५)

*गीतम्*

अष्टादशोऽध्याये सप्रयोजनं गीतलक्षणं प्रस्तुतं विद्यते । अध्यायोऽयं गद्यशैल्यां विद्यते ।

सङ्क्षेपेण मया प्रोक्तं सुराराधनकारणात् ।

गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।

देवस्यानुचरो भूत्वा तेनैव सह मोदते ॥ (विष्णुधर्मोत्तरपुराणम्, २०८० : ३७)

*नृत्तम्*

नृत्तमपि नाटकस्यास्यावश्यकमङ्गं विद्यते । अत्र नृत्तलक्षणम्, नृत्तस्य प्रकाराः, तत्राभिनयादीनि आवश्यकानि तत्त्वानि च वर्णितानि सन्ति । नृत्तगीतादिरसभावसमन्वितं भवेदिति चोल्लिखितं विद्यते ।

परस्यानुकृतिर्नाट्यं नाट्यज्ञैः कथितं नृप । तस्य संस्कारकं नृत्तं भवेच्छोभाविवर्धनम् ॥

नृत्तं तु द्विविधं प्रोक्तं नाट्यलास्याश्रयं सदा द्वैविध्यं द्विविधस्यापि पुनरुक्तं नराधिप ॥

रसेन भावेन समन्वितं च तालानुगं कायरसानुगं च ।

गीतानुगं नृत्तमुशन्ति धन्य सुखप्रदं धर्मविवर्धनं च ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ४४)

*अभिनयः*

दृश्यकाव्येऽभिनयस्य महत्त्वं समधिकं मन्यते । विष्णुधर्मोत्तरपुराणे नाटकस्य मुख्यतत्त्वभूतस्याभिनयस्य सप्रकारं वर्णनं विद्यते । तत्र आहार्यः, आङ्गिकः, वाचिकः, सात्त्विकश्चेति चत्वारोऽनयप्रकारा वर्णिताः सन्ति ।

वाचिकश्च तथाहार्यस्त्वाङ्गिकस्सात्विकस्तथा ।

चतुष्प्रकारोऽभिनयः कीर्तितो नाट्यकोविदैः॥(विष्णुधर्मोत्तरपुराणम्,२०८० : ७०)

वचसा क्रियमाणोऽभिनयो **वाचिकः** कथ्यते । आहर्तुं योग्य आहार्यः, वेषरचनादिभिर्निष्पाद्योऽभिनय **आहार्यः** कथ्यते। आहार्यस्तु चतुर्विधो विद्यते यत्- प्रस्तः, अलङ्कारः, अङ्गरचना, सञ्जीवञ्चेति ।

वाचिको वचसा प्रोक्तः शृणु हार्यं नराधिप ।

चतुर्विधं तु विज्ञेयं प्रस्तोऽलङ्कार एव च ॥

तथाङ्गरचना चैव ज्ञेया सज्जीवमेव च । (विष्णुधर्मोत्तरपुराणम्, २०८० : ७०)

तेषु मृदा, दारुणा, वस्त्रेण, चर्मणा, लोहैर्वा देवदानवयक्षगजाश्वमृगपक्षिणाम् अनुकृतिर्यत्र निर्मीयते तादृशः **प्रस्तोऽ**भिनयः कथ्यते, यत्-

मृदा वा दारुणा वापि वस्त्रेणाप्यथ चर्मणा । लोहैरनुकृतिर्वापि प्रस्त इत्यभिधीयते ॥

देवदानवयक्षाणां गजाश्वमृगपक्षिणाम् । कार्याणि प्रतिशीर्षाणि नाट्यज्ञैः प्रस्तकर्मणा ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ७०)

माल्याभरणवाससां सज्जीकरणेन कृतोऽभिनयो**ऽलङ्कारः** कथ्यते, यत्-

अलङ्कारस्तु विज्ञेयो माल्याभरणवाससाम् । नानाविधः समायोगे ह्यङ्गोपाङ्गविनिर्गतः ॥

तच्च कार्यो नयो बुध्दा नियोगं जातिमेव च । आधिपत्यं यथा स्थानं देशे च नृपसत्तमः ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ७०)

**अङ्गरचना**ऽभिनये शारीरिकसंस्कारसम्बद्धस्याभिनयस्य वर्णनं विद्यते यत्

अतोऽङ्गरचनां तुभ्यं वक्ष्यामि नृप वर्णजाम् । श्वेतरक्तस्तथा पीतो कृष्णो हरितमेव च ॥

मूलवर्णाः समाख्याताः पञ्च पार्थिवसत्तम । एकद्वित्रिसमायोगाद्भावकल्पनया तथा ॥

सङ्ख्यैवान्तरवर्णानां लोके कर्तुं न शक्यते ।

(विष्णुधर्मोत्तरपुराणम्, २०८० : ७०)

तत्र कुत्र-कुत्र को वर्णः प्रयुज्यते, कस्य कृते कीदृश वेषः समायोज्य इत्यपि उल्लिखितं विद्यते, यत्-

राज्ञां विचित्रो वेशः स्याद्वेश्यास्त्रीणां च यादव । यथालिङ्गं भवेद्वेशस्तथान्येषां तु लोकतः ।

त्रिविधा मुकुटा ज्ञेया देवपार्थिवः संश्रयाः । देवानां पार्थिवानां च कर्तव्यास्तु कीरिटकाः ।

(विष्णुधर्मोत्तरपुराणम्, २०८० : ७२)

**सज्जीव**मित्यभिनयप्रकारे मानवेतराणां जीवानामभिनयो वर्ण्यते, यत्-

सज्जीव इति यत् प्रोक्तं तस्य वक्ष्यामि लक्षणम् । प्रवेशस्तु तिरश्चां वै सज्जीव इति संज्ञितः ।

तेषां प्रस्तेन कर्तव्या प्रकृतिः पुरुषान्तरा । तथैवायुधहस्तानां कर्तव्या हेतयः शुभाः ॥

एवं लोकोपचारेण स्वबुद्ध्या विभवेन च । नाट्योपकरणानीह यथावत्परिकल्पयेत् ॥

हेतिप्रमोक्षो न तु रङ्गमध्ये कार्यो भवेत् पार्थिववंशमुख्यः ।

आहार्यमेतत्कथितं समासाद्वक्ष्याम्यतश्चाङ्गिकमेव तुभ्यम् ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ७३)

*आङ्गिकाभिनयः*

अङ्गेन निर्वृत्ताभिनयः आङ्गिकः । शिरोहस्तोरूपादपार्श्वकटीलक्षणानि षडङ्गानि, एवमेव नेत्रभ्रूनासिकाधरकपोलचिबुकरूपाणि षडुपाङ्गानि तैर्विहिताभिनयः आङ्गिकः । तत्र मूर्छागतमृताद्यवस्थानामभिनयोऽपि भवति।

शब्दं स्पर्शश्च रूपं च रसो गन्धस्तथैव च । इन्द्रियाणीन्द्रियार्थांस्तु भावेनाभिनयेद्बुधः ॥

उछवासेन तु दीर्घेण मृत्युकालं तु नाटयेत् । गात्रनिष्पन्दभावेन मृतस्याभिनयो भवेत् ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ७४)

*सात्विकाभिनयः*

सात्विकाभिनयस्तु सत्वजन्याभिनयो विद्यते । सत्त्वं स्वेदस्तम्भादिः, तेन निर्वृत्तः सात्त्विकः, स्तम्भस्वेदादिमनोभावनिष्पाद्य इत्यर्थः । तस्याभिनयस्य वर्णनं रसभाववर्णनप्रसङ्गे क्रियते इत्युल्लिखितं विद्यते-

सात्विकाभिनयं वक्ष्ये रसभावेषु पार्थिव। (विष्णुधर्मोत्तरपुराणम्, २०८० : ७९)

अत्र सत्वजन्यस्वेदरोमाञ्चाद्यभिनयो भवति। रसवर्णनप्रसङ्गे आनुषङ्गेन समायाति।

ये चान्ये सात्विका भावा नानाभिनययोनिजा। रसेष्वेतेषु ते सर्वे विज्ञेया नाट्यकोविदैः ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ८९)

अभिनयवर्णनप्रकरणान्ते मार्कण्डेयमुनिरभिनयप्रकारा अनन्ता विद्यन्ते। तेषु केचन मुख्या एव मया श्राविता इति कथयति, यत्-

एतावदेवाभिनये तु तुभ्यं शक्यं मया पार्थिवमुख्य वक्तुम्।

नाट्यं हि विश्वस्य यतोऽनुकारं कृत्स्नं ततो वक्तुमशक्यमीश ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ७९)

*रसस्वरूपम्*

विष्णुधर्मोत्तरपुराणकारो रसपक्षपाती ज्ञायते। अयं महाकाव्ये नाटके च रसस्यानिवार्यत्वं प्रस्तौति। तदनु पृथक् प्रकरणे रससङ्ख्या, रसस्वरूपम्, रसभेदाः, रसाभिनयश्चेत्यादिरससम्बद्धान् विषयान् सविस्तारं वर्णयति। नाट्यशास्त्रमनु सञ्जातस्यास्य पुराणस्य रसानुरागः स्वभाविक एव।

शृङ्गाररौद्रवीरबीभत्सा इति प्रधानरसाः चत्वार एव। तेभ्य क्रमशो हास्यकरुणोद्भुतभयानका इति चत्वारो रसाः समुत्पन्नाः। एतेऽष्टौ रसा नाट्यशास्त्रप्रतिपादिताः। तत्र शान्तरसं समाविश्य विष्णुधर्मोत्तरपुराणकारेण रससङ्ख्या नव प्रतिपादिता। तेषां स्वरूपादिवर्णितं पद्यमत्र क्रमशः प्रस्तूयते।

शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणोदय ॥ वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः।

शान्तो रसः स्वतन्त्रोऽत्र पृथगेव व्यवस्थितः।

हास्यशृङ्गारकरुणवीररौद्रभयानकाः । बीभत्साद्भुतशान्ताख्या नव नाट्ये रसाः स्मृताः ॥

शान्तस्य तु समुत्पत्तिर्नृप वैराग्यतः स्मृता । स चाभिनेयो भवति लिङ्गग्रहणतस्तथा ॥

सर्वभूतदयाध्यानमोक्षमार्गप्रवर्तनैः । नास्ति यत्र सुखं दुःखं न द्वेषो नापि मत्सर ॥

सम सर्वेषु भूतेषु स **शान्त** प्रथितो रसः । **हास्य**स्य तु समुत्पत्तिरसम्बद्धप्रलापतः ॥

असम्बद्धात्तथा वेशाद्भवतीति विनिश्चय । आत्मस्थश्च परस्थश्च द्विविध स च कीर्तितः ॥

**शृङ्गारो** द्विविध प्रोक्तः सम्भोगाद्विरहात्तथा । विप्रलम्भकृतस्यात्र निर्वेदोऽभिनयक्रियः॥

शोकाद्भवति राजेन्द्र तथैव **करुणो** रसः । स्रस्तगात्रत्वनिःश्वासपरिदेवितरौदनैः ॥

मुखवैवर्ण्यशोषैश्च तस्येहाभिनयो भवेत् । क्रोधाद्भवति **रौद्र**स्य रसस्य तु समुद्भवः ॥

रक्तत्वनेत्रभ्रुकुटिक्रोधामर्षैः ससाहसैः । भया**द्भयानक**स्येह रसस्य तु समुद्भवः ॥

मुखवैवर्ण्यसन्त्रासशोषैरभिनयो भवेत् । जुगुप्सया च भवति **बीभत्स**स्य समुद्भवः ॥

नासाविकूणनात्तस्य चोद्वेगेन तथैव च । आश्चर्येण समुत्पत्ति**रद्भुतं** तत्प्रकीर्तितम् ॥

प्रस्फुरिताक्षिरोमाञ्चैरङ्गुलीभ्रमणादिभिः । स्वेदेन चाभिनेयस्यादद्भुतस्तु तथा रसः ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ८३,८४)

*रसमहत्त्वम्*

विष्णुधर्मोत्तरपुराणकारो रसवादी ज्ञायते । पुराणस्य काव्यशास्त्रीयखण्डे स्थाने स्थाने रसमुल्लिख्य तस्य काव्येऽनिवार्यत्वं सूचयति । एष नाट्यस्य मूलं रसोऽस्ति, रसेन हीनं काव्यम्, नाट्यम्, नृत्तं वा किमपि न भवतीति रसमोहं प्रदर्शयति ।

नाट्यस्य मूलं तु रसः प्रदीष्टो रसेन हीनं न हि नृत्तमस्ति ।

तस्मात्प्रयत्नेन रसाश्रयस्य नृत्तस्य यत्नः पुरुषेण कार्यः ॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ८५)

*स्थायिसञ्चारिभाववर्णनम्*

प्राग् वर्णितानां नवरसानां स्थायिभावः, रसास्वदनावसरेऽस्थायिरूपेण समागमनशीलाः सञ्चारिभावाश्चात्र स्वरूपसहिता वर्णिता विद्यन्ते।

भावाध्यायमतो वच्मि तन्मे निगदत शृणु। हासाद्या कथिता भावाः पञ्चाशत्त्वेकवर्जिता॥

ये चान्ये सात्त्विका भावा नानाभिनययोनिजाः। रसेष्वेतेषु ते सर्वे विज्ञेया नाट्यकोविदैः॥

बहूनां समवेतानां रूपं यस्य भवेद्बहु। समन्तव्यो रसः स्थायी शेषाः सञ्चारिणः स्मृताः॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ८५)

*रसभावमहत्त्वम्*

रसविषये विष्णुधर्मोत्तरकारो नाट्यशास्त्रमाधारत्वेनाङ्गीकरोति। यथा नाट्यशास्त्रे काव्यस्य कृते रसभावयोर्महत्त्वं सर्वोपरि स्वीकृतम्, तथैवात्रापि रसभावयोर्महत्त्वं सर्वाधिकं स्वीकृतमस्ति।

न ह्येकरसजं काव्यं किञ्चिदस्ति प्रयोगजम्। भावो वापि रसो वापि प्रवृत्तिर्वृत्तिरेव च॥

एकोनपञ्चशदिमे समग्रा भावव्यवस्था गदिता मया ते।

युक्त्या च ये यत्र रसे नियुक्ताः प्रोक्तं तदप्यत्र नरेन्द्रचन्द्र॥

(विष्णुधर्मोत्तरपुराणम्, २०८० : ८९)

विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयांशस्य अन्यग्रन्थैः सह सम्बन्धः

अस्य काव्यलक्षणं परम्पागतशब्दार्थोऽयं नैव विद्यते। काव्यशरीरं तु पूर्वाचार्यैर्वर्णितमेव तत्र पिष्टपेषणं भवतीति विचार्य विष्णुधर्मोत्तरपुराणकारेण काव्यलक्षणं प्रतिपादितमित्यनुमीयते। तेन उपदेशेन विना कृतं व्यङ्गनिष्ठं धर्मार्थकामसाधितो मोक्षो यत्र वर्ण्यते एवञ्च एकस्य नायकस्य चरितवर्णनं विद्यते तदेव काव्यं भवतीति पृथक्तया काव्यलक्षणं प्रतिपादितम्।

विष्णुधर्मोत्तरपुराणस्य महाकाव्यलक्षणं प्राचीनकालदृष्ट्या महत्त्वं भजते। तदा स्पष्टतया महाकाव्यस्य स्वरूपं नासीत्। सर्वान् महाकाव्यतत्त्वादिकान् नवीनत्वेन परिकल्प्य निर्धारणं काठिनं मन्यते। तथाप्यत्र नवरसैर्व्याप्तम्,

रसप्रतीत्यवरोधकैर्दोषैर्विहीनम्, प्रकृतिवर्णनयुतम्, नायकप्रतिनायकयोर्नायकस्याभ्युदयवर्णम्, इत्यादीनि लक्षणघटितानि तत्त्वान्युत्तरवर्तिभिर्विश्वनाथादिभिराचार्यैरनुकृतानि विद्यन्ते । अधुना यद् महाकाव्यलक्षणं परिपूर्णं प्राप्यते तस्य कृते विष्णुधर्मोत्तरपुराणमुपजीव्यत्वमाचरतीति मन्यते । तस्माद् विष्णुधर्मोत्तरपुराणस्य महाकाव्यलक्षणमाधारत्वेन स्वीक्रियते ।

अग्निपुराणकारो नाट्यशास्त्रे वर्णितां अलङ्कारसङ्ख्यां विस्तारयति । नाट्यशास्त्रे चत्वार एव अलङ्कारा वर्णिताः । तदुपरि त्रयोदशालङ्कारान् परिकल्प्यानेन सप्तदशसङ्ख्या विहिता । अनन्तरं भामहोऽष्टत्रिंशदलङ्कारान् विवेचयति । अत्र केवलमलङ्कारस्य स्वरूपमेव वर्णितम्, तथापि अलङ्कारविकासक्रमे महत्त्वाधिकमावहति । अस्यालङ्कारविवेचनमाधारत्वेन गृहीत्वा अलङ्कारशास्त्रिभिरलङ्कारसङ्ख्या शताधिका विहिता । मार्कण्डेयमुनिरन्यैः काव्यशास्त्रज्ञैः कथितान् अलङ्कारान् लेशमात्रमेव मया कथितमिति नृपं वज्रं कथयति । अतो नाट्यशास्त्रमनु अन्येऽप्यालङ्कारशास्त्रिणः आसीत्, तैर्विहितमलङ्कारवर्णनं सङ्कलनरूपेणात्र प्रस्तुतमित्यपि ज्ञायते। तस्मादलङ्कारविषये विष्णुधर्मोत्तरपुराणकारस्य परम्परागता धारणा आसीदित्यनुमीयते ।

प्रहेलिका काव्यभेदरूपेण तु स्वीकर्तुं न शक्यते तथाप्यत्र शब्दार्थवैचित्र्यमनुलक्ष्यते । प्राचीनकालादेव राजसभायाम्, बौद्धिकसमाजे, छात्रसमाजे, लोकव्यवहारे च बुद्धिविनोदार्थं परिहासार्थं वा प्रहेलिकायाः परम्परा दृश्यते । दण्डीप्रभृतिभिः कतिपयाचार्यैः प्रहेलिकाया विषये सप्रभेदं वर्णनं कृतं विद्यते । अतो विष्णुधर्मोत्तरपुराणकारेण कृतं भेदसहितं प्रहेलिकाया वर्णनं महत्त्वपूर्णमाभाति ।

काव्यरचनायां पुराणस्य महत्त्वं भवति । काव्यस्याङ्गभूतस्य कथानकस्य कृते पुराणमुपजीव्यमिति विचार्य विष्णुधर्मोत्तरकारेण पुराणलक्षणमपि समाविष्टं विद्यते । अत्र काव्यलक्षणं पुराणस्वरूपाद् भिन्नमिति प्रतिपादनार्थं केवलं पुराणलक्षणं कृतं विद्यते ।

विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयांशो दृश्यकाव्यमुद्दिश्य समाविष्ट इति ज्ञायते । अत्र श्रव्यकाव्यमपेक्ष्य दृश्यकाव्यं साङ्गोपाङ्गं विवेचितं विद्यते । अस्य दृश्यकाव्यस्वरूपादिवर्णनं नाट्यशास्त्रानुरूपमभिज्ञायते । नाटके मुख्यतस्त्रिदशानां चरित्रम्, एकनायकस्य वा नायकप्रतिनायकयोः स्थापनम्, सर्वा वृत्तयः, शृङ्गारादिरससंयोजनम्, पञ्च अङ्कादारभ्य दशाङ्कपर्यन्तसङ्घटनम्, इत्यादयो विषयाः नाटकरचनायां निर्धारिताः सन्ति । एतादृशं नाटकस्वरूपं पश्चवर्तिभिर्नाट्याचार्यैरङ्गीकृतं दृश्यते । तदनु अन्य रूपकप्रकाराणां स्वरूपवर्णनमपि महत्त्वं प्रकाशयति । नाट्यशास्त्रे दशरूपकाणामेव विवेचनं प्राप्यते परमत्र नाटिका, प्रकरणी इति तत्र उपरूपकप्रकरणे वर्णितं प्रकारद्वयं समाविश्य द्वादशरूपकाणि वर्णितानि विद्यन्ते । अत्रोपरूपकाणां चर्चा न लभ्यते । एवञ्च नाट्याङ्गभूतानां गीतनृत्तादीनामपि विस्तृता चर्चा लभ्यते। नाट्यशास्त्रे रसस्य

प्राधान्यमपेक्षितं विद्यते। अत्रापि नाटकभेदेष्वेव नापितु गीतनृत्ताभिनयेष्वपि रसस्य विषये सावधानेन भाव्यम्, सर्वे नाट्यङ्गा रससापेक्षतया भवेयुरिति स्थाने स्थाने रसावश्यकसङ्केताः प्राप्यन्ते । द्वादशरूपकस्य वर्णनपश्चात् नाट्याङ्गभूतस्य गीतनृत्ताभिनयाः, तेषां प्रकाराश्च विस्तारेण वर्णिता विद्यन्ते । तेषु चत्वारोऽभिनयप्रकारा महत्त्वं भजन्ते। नाट्यशास्त्रमनु रचितेऽस्मिन् पुराणे नाट्यशास्त्रस्य प्रभावबाहूल्यं विद्यते। दृश्यकाव्यविषये कुत्रचिद् नावीन्यमपि दृश्यते । एतादृशी नाट्यचर्चा तात्कालिकं समयानुरूपं महत्त्वाधिकं भजते।

*सम्बन्धसारः*

विष्णुधर्मोत्तरपुराणस्य तृतीयखण्डस्य १४-३१ अध्यायपर्यन्तं काव्यशास्त्रीयचर्चा लभ्यते । अत्र वर्णितेषु विषयेषु प्रायशो नाट्यशास्त्रस्य प्रभावो दृश्यते। तस्मादेव बीजं गृहीत्वा अत्र नाट्यकाव्यस्य रसस्य च चर्चा सविस्तारेण कृता इति मन्यते। कुत्रचिद् पूर्ववर्णितेषु विषयेषु सूक्ष्मान्वेषणम्, कुत्रचिद् नवीनविषयोद्घाटनमपि प्राप्यते। पुराणेऽस्मिन् काव्यम्, महाकाव्यम्, अलङ्कारः, प्रहेलिका, नाट्यम्, नृत्तम्, गीतम्, अभिनयः, रस इत्यादिषु काव्यशास्त्रीयविषयेषु सुस्पष्टा चर्चा विद्यते । नाट्यशास्त्रमनु भामहात् प्राक् रचितेऽस्मिन् पुराणे प्रायशः नाट्यशास्त्रे विवेचिता विषया एव समाविष्टाः। परं विष्णुधर्मोत्तरपुराणकारो द्वादशरूपकम्, नवरसाः, प्रहेलिकाविवेचनम्, इत्यादिषु विषयेषु स्वकीयं मतमुपस्थापयति । एष उत्तरवर्तिभिः काव्यशास्त्रीयैराचार्यैरभिनन्दितश्च दृश्यते । रचनासमयानुरूपमस्य पुराणस्य काव्यशास्त्रीयविषयवर्णनं महत्त्वाधिकं व्यनक्ति।

**निष्कर्षः**

पौरस्त्यशास्त्रीयपरम्परा प्राचीना प्रौढा चेति सर्वसम्मतं विद्यते। विश्ववाङ्मये ये ये नवीनाः सिद्धान्ता विकसिता तेषां कृतेऽपि पौरस्त्यवाङ्मयमुपजीव्यमिति मन्यते । तस्य कृते काव्यशास्त्रीयग्रन्थानामेव नापितु पौराणिकग्रन्थानामपि योगदानमन्यूनानतिरिक्तं विद्यते । तत्क्रमे विष्णुधर्मोत्तरपुराणमपि समायाति । काव्यशास्त्रीयेतिहासपरम्परायां केवलमग्निपुराणस्य नाम एवोल्लिखितम् । विष्णुधर्मोत्तरस्य नाम किमुपेक्षितमिति समालोचकः काणेमहोदय आश्चर्यमनुभवति । तस्माद् ज्ञायते यत्- विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयभागस्य चर्चा नवीनतमा इति । काव्यशास्त्रस्येतिहासकारैरपि पुराणस्यास्य नाम उपेक्षितमनुभूयते। सूक्ष्मतया विनिभालनेनात्र केषुचित् काव्यशास्त्रीयविषयेषु नवीना चर्चा समुपलभ्यते। यदा पुराणस्यास्य रचना जाता तदा काव्यशास्त्रस्य पूर्णतया विकासो नासीत् । तस्मिन् समये ईदृशं काव्यशास्त्रीयतत्त्वविवेचनं महत्त्वमाभाति । कतिपयस्थलेषु पूर्वाचार्याणां शास्त्रीयविचारैः प्रभावितं दृश्यते तथापि स्थाने स्थाने स्वकीयं नावीन्यमप्युपस्थापितं विद्यते । नाटकस्याङ्गोपाङ्गवर्णनम्, नवरसानुरागः,

प्रहेलिकायाः सभेदविवेचनमित्यादयो विषया नावीन्यं भजन्ते। एवञ्च काव्यशास्त्रीयतत्त्वं भगवतः आराधनया सह संयोज्य सर्वमेव वाङ्मयं ईश्वरीयमिति रहस्यप्रकाशनमप्यस्य महत्त्वं प्रकाशयति। अधुना काव्यशास्त्रस्य समृद्धावस्थया सहास्यपुराणस्य काव्यशास्त्रीयं विवेचनं न्यूनं भवेत् परं तात्कालिकसमयदृष्ट्या अस्य महत्त्वमन्यूनमाभाति । आशासे काव्यशास्त्राध्ययनसंलग्ना विवेचका विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयतत्त्वान् व्यष्टिरूपेण अधीत्य अन्यै शास्त्रीयग्रन्थैः सह तुलनात्मकमध्ययनं विधाय गूढार्थं प्रकाशयिष्यन्तीति।

## सन्दर्भग्रन्थसूची

उपाध्याय बलदेव (१९७८), *पुराणविमर्शः,* चौखम्बा विद्याभवन।

काणे पीबी (१९६६), *संस्कृत काव्यशास्त्र का इतिहास*, मोतीलाल बनारसी दास।

कुमार सुनिल (१९७३), *संस्कृत काव्यशास्त्र का इतिहास* (हि.अनु. नारायण शर्मा) विहार हिन्दी ग्रन्थ अकादमी।

चन्द्रा माण्डवी (१९९०), *पौराणिक काव्यशास्त्रका तत्त्वानुशीलन,* भारतीय संस्कृत संस्थान।

त्रिपाठी राधावल्लभ (२००४), संस्कृत काव्यशास्त्र और काव्यपरम्परा,(द्वि.सं.)प्रतिभा प्रकाशन।

दण्डी (१९९६), *काव्यादर्शः* (व्या. रामचन्द्रमिश्रः), चौखम्बा विद्याभवन।

द्विवेदी पारसनाथः (२०२२), नाट्यशास्त्र का इतिहास, चौखम्बा सुरभारती।

मम्मटः (१९८३), *काव्यप्रकाशः* (अष्टमः संस्करणम्), साहित्यभण्डार।

वाणभट्टः (१९९९), *कादम्बरी* (व्या. शेषराजरेग्मी), चौखम्बा सुरभारती प्रकाशन।

विश्वनाथः (१९९५), *साहित्यदर्पणः,* चौखम्बा सुरभारती प्रकाशन।

वेदव्यासः(२०२४), *विष्णुधर्मोत्तरपुराणम्*, (व्या. कपिलदेव नारायण) चौखम्बा संस्कृत सीरिज आफिस।